ॐ हरिः ॐ श्रीगुरुभ्यो नमः हरिः ॐ

ॐ श्री परमात्मने नमः

अथ नवमोऽध्यायः। राजविद्याराजगुह्य योगः।

श्री भगवानुवाच।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।

ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥९-१॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।

प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥९-२॥

अश्रद्दधानाः पुरुषाः धर्मस्यास्य परंतप।

अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥९-३॥

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ९-४॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।

भूतभृन्न च भूतस्थः ममात्मा भूतभावनः॥ ९-५॥

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।

तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ९-६॥

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥९-७॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।

भूतग्राममिमं कृत्स्नं अवशं प्रकृतेर्वशात्॥९-८॥

न च मां तानि कर्माणि निबध्नन्ति धनंजय।

उदासीनवदासीनं असक्तं तेषु कर्मसु॥९-९॥

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।

हेतुनानेन कौन्तेय जगद्विपरिवर्तते॥९-१०॥

अवजानन्ति मां मूढाः मानुषीं तनुमाश्रितम्।

परं भावमजानन्तः मम भूतमहेश्वरम्॥९-११॥

मोघाशा मोघकर्माणः मोघज्ञाना विचेतसः।

राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥९-१२॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।

भजन्त्यनन्यमनसः ज्ञात्वा भूतादिमव्ययम्॥९-१३॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।

नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥९-१४॥

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।

एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥९-१५॥

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्।

मन्त्रोऽहमहमेवाज्यं अहमग्निरहं हुतम्॥९-१६॥

पिताहमस्य जगतः माता धाता पितामहः।

वेद्यं पवित्रमोङ्कारः ऋक्साम यजुरेव च॥९-१७॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।

प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥९-१८॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।

अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥९-१९॥

त्रैविद्या मां सोमपाः पूतपापाः

यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।

ते पुण्यमासाद्य सुरेन्द्रलोकं

अश्नन्ति दिव्यान्दिवि देवभोगान्॥ ९-२०॥

ते तं भुक्त्वा स्वर्गलोकं विशालं

क्षीणे पुण्ये मर्त्यलोकं विशन्ति।

एवं त्रयीधर्ममनुप्रपन्नाः

गतागतं कामकामा लभन्ते॥९-२१॥

ॐ तत्सत्

इति श्रीमद् भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे

श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्य योगो नाम

नवमोऽध्यायः

ॐ शान्तिः शान्तिः शान्तिः

ॐ हरिः ॐ श्रीगुरुभ्यो नमः हरिः ॐ